# dharmavyAdhagItA

# ધર્મવ્યાધગીતા

## Document Information

Text title : dharmavyaadhagItA

File name : dharmavyaadhagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Sunder Hattangadi sunder at hotmail.com

Proofread by : Sunder Hattangadi sunder at hotmail.com

Description-comments : Vana Parva of Mahabharata, Ch. 198-207 in BORI and Ch. 207-216 in Kinjawadekar edn., though the latter only has the ending as . brAhmaNa-vyAdha sa.nvAda. http://en.wikipedia.org/wiki/Vyadha_Gita

Latest update : February 12, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ધર્મવ્યાધગીતા

॥ અથ ધર્મવ્યાધગીતા ॥

વ્યાધ ઉવાચ -
વિજ્ઞાનાર્થં મનુષ્યાણાં મનઃ પૂર્વં પ્રવર્તતે ।
તત્પ્રાપ્ય કામં ભજતે ક્રોધં ચ દ્વિજસત્તમ ॥ ૧॥

તતસ્તદર્થં યતતે કર્મ ચારભતે મહત્ ।
ઇષ્ટાનાં રૂપગન્ધાનામભ્યાસં ચ નિષેવતે ॥ ૨॥

તતો રાગઃ પ્રભવતિ દ્વેષશ્ચ તદનન્તરમ્ ।
તતો લોભઃ પ્રભવતિ મોહશ્ચ તદનન્તરમ્ ॥ ૩॥

તતો લોભાભિભૂતસ્ય રાગદ્વેષહતસ્ય ચ ।
ન ધર્મે જાયતે બુદ્ધિર્વ્યાજાદ્ધર્મં કરોતિ ચ ॥ ૪॥

વ્યાજેન ચરતે ધર્મમર્થં વ્યાજેન રોચતે ।
વ્યાજેન સિદ્ધ્યમાનેષુ ધનેષુ દ્વિજસત્તમ ॥ ૫॥

તત્રૈવ રમતે બુદ્ધિસ્તતઃ પાપં ચિકીર્ષતિ ।
સુહૃદ્ભિર્વાર્યમાણશ્ચ પણ્ડિતૈશ્ચ દ્વિજોત્તમ ॥ ૬॥

ઉત્તરં શ્રુતિસમ્બદ્ધં બ્રવીત્યશ્રુતિયોજિતમ્ ।
અધર્મસ્ત્રિવિધસ્તસ્ય વર્તતે રાગદોષજઃ ॥ ૭॥

પાપં ચિન્તયતે ચૈવ બવીતિ ચ કરોતિ ચ ।
તસ્યાધર્મપ્રવૃત્તસ્ય ગુણ નશ્યન્તિ સાધવઃ ॥ ૮॥

એકાશીલૈશ્ચ મિત્રત્વં ભજન્તે પાપકર્મિણઃ ।
સતેન દુઃખમાપ્નોતિ પરત્ર ચ વિપદ્યતે ॥ ૯॥

પાપાત્મા ભવતિ હ્યેવં ધર્મલાભં તુ મે શ્રુણુ ।
યસ્ત્વેતાન્પ્રજ્ઞયા દોષાન્પૂર્વમેવાનુપશ્યતિ ॥ ૧૦॥

કુશલઃ સુખદુઃખેષુ સાધૂંશ્ચાપ્યુપસેવતે ।
તસ્ય સાધુસમારમ્ભાદ્બુદ્ધિર્ધર્મેષુ રાજતે ॥ ૧૧॥

ઇદં વિશ્વં જગત્સર્વમજય્યં ચાપિ નિત્યશઃ ।
મહાભૂતાત્મકં બ્રહ્મ નાતઃ પરતરં ભવેત્ ॥ ૧૨॥

બ્રાહ્મણ ઉવાચ -
સત્ત્વસ્ય રજસશ્ચૈવ તમસશ્ચ યથાતથમ્ ।
ગુણાંસ્તત્ત્વેન મે બ્રૂહિ યથાવદિહ પૃચ્છતઃ ॥ ૧૩॥

વ્યાધ ઉવાચ -
હન્ત તે કથયિષ્યામિ યન્માં ત્વં પરિપૃચ્છસિ ।
એષાં ગુણાન્ પૃથક્ત્વેન નિબોધ ગદતો મમ ॥ ૧૪॥

મોહાત્મકં તમસ્તેષાં રજ એષાં પ્રવર્તકમ્ ।
પ્રકાશબહુલત્વાચ્ચ સત્ત્વં જ્યાય ઇહોચ્યતે ॥ ૧૫॥

અવિદ્યાબહુલો મૂઢઃ સ્વપ્નશીલો વિચેતનઃ ।
દુર્દૃષીકસ્તતોધ્યસ્તઃ સક્રોધસ્તામસોઽલસઃ ॥ ૧૬॥

પ્રવૃત્તવાક્યો મન્ત્રી ચ યો નરાગ્ર્યોઽનસૂયકઃ ।
વિધિત્સમાનો વિપ્રર્ષે સ્તબ્ધો માની સ રાજસઃ ॥ ૧૭॥

પ્રકાશબહુલો ધીરો નિર્વિધિત્સોઽનસૂયકઃ ।
અક્રોધનો નરો ધીમાન્ દાન્તશ્ચૈવ સ સાત્ત્વિકઃ ॥ ૧૮॥

ઇતિ ધર્મવ્યાધગીતા સમાપ્તા ॥

Vana Parva of Mahabharata, Ch. 198-207 in BORI edn., and
Ch. 207-216 in Kinjawadekar edn., though the latter only has the ending as
brAhmaNa-vyAdha sa.nvAda

Encoded and Proofread by Sunder Hattangadi

*dharmavyAdhagItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*